कारकाणामन्वयोपपत्तये कालान्वयोपपत्तये च धातूनां क्रियावाचकत्वाङ्गीकारात्। तथाहि। “क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका” इति वाक्यपदीये कालानां क्रियाभेदकत्वमुक्तमुक्तञ्च तेनैव “क्रिया नियतसाधना” इत्यादिना साधनानां क्रियाकाङ्क्षित्वं तत्र यदि धातुभिः क्रिया न बोध्येत क्व तदा तेषामन्वयो विशेषणत्वं वा भवेदतोऽवश्यं सर्वेषां क्रियावाचकत्वं स्वीकार्यं धातूनां फलमात्रवाचकत्वे आख्यातानां व्यापारार्थकत्वे कृदादिस्थले आख्याताभावेन कारकाद्यन्वयानुपपत्तेः नापि क्रियामात्रवाचकत्वं त्यजिगम्योः पर्य्यायतापत्तेः। तथाच फलवाचकत्वस्य तेषां प्रायशोगणपाठे एव उक्तत्वात् न तदंशे विवादः। किन्तु फलावच्छिन्नक्रियायाः पृथक्शक्त्या विशिष्टशक्त्या वा धात्वर्थत्वाभावे सकर्म्मकाकर्म्मकविभागोच्छेदः स्यात् स्याच्च फलमात्रधात्वर्थत्वे सर्वेषां कारकाणां तत्रानन्वयः तत्रैव कालान्वयोपगमे च व्यापारविगमकालेऽपि फलसत्त्वेन वर्त्तमानत्वादिप्रयोगापत्तिः। अतोऽवश्यं क्रियावाचकत्वं स्वीकार्यमतएव “धातोरर्थः क्रियोच्यते” इत्यनेन धात्वर्थत्वेनैव क्रियात्वस्वीकारः। अतएव च “भूवादयोधातवः” इतिपाणिनीयसूत्रमपि क्रियावाचकत्वं धातुमात्राणां प्रतिपादयति। तथाहि भूश्च वा च भूवौ आदिश्चादिश्चादी भूवौ आदी येषां ते धातवइति तथा चात्र प्रथम आदिशब्दोव्यवस्थावाची भुवा सह तदन्वयात् भूप्रभृतयइत्यर्थलाभः द्वितीयआदिशब्दः सादृश्यवाची वाधातुना तदन्वयस्तेन वासदृशा इत्यर्थलाभः तत्सादृश्यञ्च क्रियावाचित्वेन वाधातोर्गत्यर्थतया क्रियावाचित्वप्रसिद्धेस्तथा च भूप्रभृतयः क्रियावाचित्वेन वासदृशा धातव इत्येव फलितम्। भुवश्चादित्वं गणपाठापेक्षया तस्य च क्रियावाचकत्वं पूर्वोक्तयुक्तेरिति संक्षेपः। अत्र क्रियावाचित्वानुक्तौ गणपठितत्वेन सर्वनामाव्ययादीनामपि धातुत्वापत्तिः तन्मात्रोक्तौ च हिरुगाद्यव्ययानां क्रियावाचित्वेन धातुत्वापत्तिरत उभयमुक्तम्। उक्तञ्च “किञ्च क्रियावाचकतां विना धातुत्वमेव नो। सर्वनामाव्ययादीनां यावादीनां प्रसङ्गतः। न हि तत्पाठमात्रेण युक्तमित्याकरे स्फुटमिति”। तत्पाठः गणपाठः। विदि अवयवे गडि वदनैकदेशे इत्यादिद्रव्यवाचिनामपि तत्साधनक्रियावाचित्वमस्त्येव कालकारकाद्यन्वयानुरोधात् तत्फलस्य द्रव्यरूपत्वेऽपि न क्षतिः। गणादीयादिपदेन सूत्रसंज्ञासूत्रग्रहणं तेन सौत्राणां स्तम्भुप्रभृतीनां सनाद्यन्ताधातव इत्यादीनाञ्च प्रत्ययान्तानां धातुत्वमव्याहतमेव दर्शितमुक्तेः तत्रापि क्रियावाचित्वादेरवश्यं स्वीकाराच्च नाप्रसङ्गइति दिक्।

ते च सर्वेऽपि धातवः सकर्म्मकाकर्म्मकभेदेन द्विविधाः। तत्र व्यापाराधिकरणमात्रावृत्तिफलवाचकः सकर्म्मकः पच्यादेः व्यापाराधिकरणावृत्तिविक्लित्तिरूपफलस्य बोधकतया सकर्म्मकत्वं कर्त्तृकर्म्मोभयनिष्ठफलबोधकस्यापि गम्यादेः व्यापाराधिकरणमात्रावृत्तिफलबोधकतया सकर्म्मकत्वम्। भूप्रभृतीनां तु व्यापाराधिकरणमात्रवृत्तिफलबोधकतया न सकर्म्मकत्वं फलस्य सत्तायास्तत्सम्बन्धरूपव्यापारस्यैकस्मिन्नेव धर्म्मिणि घटादौ सत्त्वात्। उक्तञ्च वाक्यपदीये “आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते। अन्तर्भावाच्च तेनासौ कर्म्मणा न सकर्म्मकः” इति। अस्यायमर्थः आत्मानं स्वरूपं बिभ्रत् आत्मधारणानुकूलव्यापाराश्रयः अस्तीतिपदेन समानाधिकरणतया व्यपदिश्यते तद्भेदबोधनाय तिङादिकं प्रयुज्यतेइति यावत् तेनात्मनात्मरूपेण कर्म्मणा धारणकर्म्मणा धातुः न सकर्म्मकः। अत्र हेतुरन्तर्भावात् धात्वर्थ एव तस्य कर्म्मणः प्रवेशात् आत्मधारणानुकूलव्यापाररूपधात्वर्थेनात्मन उपसंग्रहादित्यर्थः। अथ वा अन्तरेव व्यापाराधिकरण एव भावात् फलस्य सत्त्वात् व्यापारसामानाधिकरण्यादित्यर्थः तेन भुवादेरुत्पत्त्यनुकूलव्यापारवाचितया धात्वर्थोपसंगृहीतकर्म्मकत्वाभावेऽपि फलसमानाधिकरणव्यापारवाचित्वादकर्म्मकत्वम्। अतएव “फलव्यापारयोरेकनिष्ठतायामकर्म्मकः। धातुस्तयोर्धर्म्मिभेदे सकर्म्मकउदाहृत” इति फलसामानाधिकरण्यादिकृताकर्म्मकसकर्म्मकविभागोऽभिहितः। एकनिष्ठतायामेकमात्रवृत्तितायामित्यर्थः तेन गम्यादेर्व्यापाराधिकरणवृत्तिफलवाचित्वेऽपि नाकर्म्मकत्वमिति धर्म्मिभेदेऽधिकरणान्यत्वे इत्यर्थः। एवमेव शब्दकौस्तुभकारादयः। एतन्मते सकर्म्मकाकर्म्मकशब्दौ पारिभाषिकाविति द्रष्टव्यम्। मञ्जूषाकृतस्तु “कर्म्मणा सहेति नास्ति कर्म्म यस्येति व्युत्पत्त्या सकर्म्मकाकर्म्मकशब्दौ यौगिकौ तत्र साहित्यं तदन्वितस्वार्थबोधकत्वम् अन्वयश्च पृथक्पदोपस्थाप्ययोः सम्बन्धरूपोग्राह्यस्तेन जीवत्यादीनां प्राणधारणानुकूलव्यापारार्थकतया तत्कर्म्मणः प्राणादेर्धात्वर्थमध्यपातात् न सकर्म्मकत्वं धात्वर्थोपसंगृहीतकर्म्मकत्वेनाकर्म्मकत्वात्। कर्म्म च व्याकरणशा-